VAAKYAM

स्वादुषꣳसद : पितर :

svāduṣaꣳsada : pitara :

स्वादुषꣳसद : पितरो वयोधा : कृच्छ्रेश्रित श्शक्तीवन्तो गभीरा : ।
चित्रसेना - इषुबला - अमृध्रास्सतोवीरा - उरवो व्रातसाहा : ॥
ब्राह्मणास : पितर स्सोम्यास श्शिवेनो द्यावापृथिवी - अनेहसा ।

पूषान : पातु दुरितादृतावृधो[1] रक्षामाकिर्नो - अघशꣳस ईशत ॥
सुपर्णम्वस्ते मृगो - अस्या दन्तो गोभि स्सन्नद्धा पतति प्रसूता ।
यत्रा नर स्सञ्चवि च द्रवन्ति तत्रास्मभ्यमिषव श्शर्म यꣳसन् ॥

GHANAM

1 स्वादुषꣳसदः पितरः पितरः स्वादुषꣳसदः
स्वादुषꣳसदः पितरो वयोधा वयोधाः पितरः
स्वादुषꣳसदः स्वादुषꣳसदः पितरो वयोधाः ।
2 स्वादुषꣳसद इति स्वादु = सꣳसदः ।

3 पितरो वयोधा वयोधाः पितरः पितरो वयोधाः
कृच्छ्रेश्रितः कृच्छ्रेश्रितो वयोधाः पितरः पितरो
वयोधाः कृच्छ्रेश्रितः ।

4 वयोधाः कृच्छ्रेश्रितः कृच्छ्रेश्रितो वयोधा वयोधाः
कृच्छ्रेश्रित श्शक्तीवन्त श्शक्तीवन्तः कृच्छ्रेश्रितो वयोधा
वयोधाः कृच्छ्रेश्रित श्शक्तीवन्तः ।
5 वयोधा इति वयः = धाः ।

6 कृच्छ्रेश्रित श्शक्तींवन्त श्शक्तींवन्त : कृच्छ्रेश्रितं :
कृच्छ्रेश्रित श्शक्तींवन्तो गभीरा गंभीरा श्शक्तींवन्त :
कृच्छ्रेश्रितं : कृच्छ्रेश्रित श्शक्तींवन्तो गभीरा : ।

7 कृच्छ्रेश्रित इतिं कृच्छ्रे = श्रितं : ।

8 शक्तींवन्तो गभीरा गंभीरा श्शक्तींवन्त श्शक्तींवन्तो
गभीरा : ।

9 शक्तींवन्त इति शक्तीं = वन्त : ।

10 गभीरा इतिं गभीरा : ।।

11 चित्रसेंना - इषुंबला - इषुंबला श्चित्रसेंना श्चित्रसेंना
- इषुंबला - अमृंध्रा - अमृंध्रा - इषुंबला श्चित्रसेंना
श्चित्रसेंना - इषुंबला - अमृंध्रा : ।

12 चित्रसेंना इतिं चित्र = सेना : ।

13 इषुबला - अमृध्रा - अमृध्रा - इषुबला - इषुबला -
अमृध्रा स्सतोवीरा स्सतोवीरा - अमृध्रा - इषुबला -
इषुबला - अमृध्रा स्सतोवीरा : ।

14 इषुबला इतीषु = बला : ।

15 अमृध्रा स्सतोवीरा स्सतोवीरा - अमृध्रा - अमृध्रा
स्सतोवीरा - उरव उरव स्सतोवीरा - अमृध्रा -
अमृध्रा स्सतोवीरा - उरव : ।

16 सतोवीरा - उरव उरव स्सतोवीरा स्सतोवीरा - उरवो
व्रातसाहा व्रातसाहा - उरव स्सतोवीरा स्सतोवीरा -
उरवो व्रातसाहा : ।

17 सतोवीरा इति सत : = वीरा : ।

18 उरवो व्रातसाहा व्रातसाहा- उरव उरवो व्रातसाहा :।

19 व्रातसाहा इति व्रात = साहा : ।।

20 ब्राह्मणास : पितर : पितरो ब्राह्मणासो ब्राह्मणास :
पितर स्सोम्यास स्सोम्यास : पितरो ब्राह्मणासो
ब्राह्मणास : पितर स्सोम्यास : ।

21 पितर स्सोम्यास स्सोम्यास : पितर : पितर स्सोम्यास
श्शिवे शिवे सोम्यास : पितर : पितर स्सोम्यासश्शिवे।

22 सोम्यास श्शिवे शिवे सोम्यास स्सोम्यास श्शिवे नो न
श्शिवे सोम्यास स्सोम्यास श्शिवे न : ।

23 शिवे नो न श्शिवे शिवे नो द्यावापृथिवी द्यावापृथिवी
न श्शिवे शिवे नो द्यावापृथिवी । शिवे इति शिवे ।

24 नो द्यावापृथिवी द्यावापृथिवी नो नो द्यावापृथिवी -
अनेहसाऽनेहसा द्यावापृथिवी नो नो द्यावापृथिवी -
अनेहसा ।

25 द्यावापृथिवी - अनेहसाऽनेहसा द्यावापृथिवी
द्यावापृथिवी - अनेहसा । द्यावापृथिवी इति द्यावा =
पृथिवी । अनेहसेत्यनेहसा ।।

26 पूषा नो न : पूषा पूषा न : पातु पातु न : पूषा
पूषा न : पातु ।

27 न : पातु पातु नो न : पातु दुरितादुरिता त्पातु
नो न : पातु दुरितात् ।
28 पातु दुरितादुरिता त्पातु पातु दुरितादृतावृध ऋतावृधो
दुरिता त्पातु पातु दुरितादृतावृध : ।

29 दुरितादृतावृध ऋतावृधो दुरितादुरितादृतावृधो रक्ष
रक्षर्तावृधो दुरितादुरिता दृतावृधो रक्ष ।
30 दुरितादिति दु : = इतात् ।
31 ऋतावृधो रक्ष रक्षर्तावृध ऋतावृधो रक्षा माकि र्माकी -
रक्षर्तावृध ऋतावृधो रक्षा माकि : ।

32 ऋतावृध इत्यृत = वृध : ।

33 रक्षा माकि र्माकी - रक्ष रक्षा माकि र्नो नो माकी -

रक्ष रक्षा माकि र्न : ।

34 माकिर्नो नो माकिर्माकिर्नो - अघशꣳसोऽघशꣳसो नो

माकिर्माकिर्नो - अघशꣳस : ।

35 नो - अघशꣳसोऽघशꣳसो नो नो - अघशꣳस

ईशतेशताघशꣳसो नो नो - अघशꣳस ईशत ।

36 अघशꣳस ईशतेशताघशꣳसोऽघशꣳस ईशत ।

37 अघशꣳस इत्यघ = शꣳस : । ईशतेतीशत ॥

38 सुपर्णँ वस्ते वस्ते सुपर्णꣳ सुपर्णँ वस्ते मृगो मृगो वस्ते
सुपर्णꣳ सुपर्णँ वस्ते मृग : । सुपर्णमिति सु = पर्णम् ।

39 वस्ते मृगो मृगो वस्ते वस्ते मृगो - अस्या - अस्या
मृगो वस्ते वस्ते मृगो - अस्या : ।

40 मृगो - अस्या - अस्या मृगो मृगो - अस्या दन्तो
दन्तो - अस्या मृगो मृगो - अस्या दन्त : ।

41 अस्या दन्तो दन्तो - अस्या - अस्या दन्तो गोभि
र्गोभि र्दन्तो - अस्या - अस्या दन्तो गोभि : ।

42 दन्तो गोभि र्गोभि र्दन्तो दन्तो गोभि स्सन्नद्धा सन्नद्धा
गोभि र्दन्तो दन्तो गोभि स्सन्नद्धा ।

43 गोभि स्सन्नद्धा सन्नद्धा गोभि र्गोभि स्सन्नद्धा पतति
पतति सन्नद्धा गोभि र्गोभि स्सन्नद्धा पतति ।

44 सन्नंद्धा पतति पतति सन्नंद्धा सन्नंद्धा पतति प्रसूंता

प्रसूंता पतति सन्नंद्धा सन्नंद्धा पतति प्रसूंता ।

45 सन्नद्धेति सं = नद्धा ।

46 पतति प्रसूंता प्रसूंता पतति पतति प्रसूंता ।

प्रसूतेति प्र = सूता ॥

47 यत्रा नरो नरो यत्र यत्रा नर स्सꣳ स न्नरो यत्र यत्रा

नर स्सम् ।

48 नर स्सꣳ स न्नरो नर स्सञ्चं च स न्नरो नर स्सञ्चं ।

49 सञ्चं च सꣳ सञ्च वि वि च सꣳ सञ्च वि ।

50 च वि वि चं च - वि चं च - वि चं च - वि चं ।

51 वि च च - वि वि च द्रवन्ति द्रवन्ति च - वि वि च
द्रवन्ति ।

52 च द्रवन्ति द्रवन्ति च च द्रवन्ति तत्र तत्र द्रवन्ति च च
द्रवन्ति तत्र ।

53 द्रवन्ति तत्र तत्र द्रवन्ति द्रवन्ति तत्रास्मभ्यमस्मभ्य न्तत्र
द्रवन्ति द्रवन्ति तत्रास्मभ्यम् ।

54 तत्रास्मभ्यमस्मभ्य न्तत्र तत्रास्मभ्यमिषव इषवो -
अस्मभ्य न्तत्र तत्रास्मभ्यमिषव : ।

55 अस्मभ्यमिषव इषवो - अस्मभ्यमस्मभ्यमिषव श्शर्म
शर्मेषवो - अस्मभ्यमस्मभ्यमिषव श्शर्म ।

56 अस्मभ्यमित्यस्म = भ्यं ।

57 इष॑व श्शर्म शर्मे॑ष॑व इष॑व श्शर्म᳚ यꣳसन् - यꣳस
ञ्छर्मे॑ष॑व इष॑व श्शर्म᳚यꣳसन्न् ।
58 शर्म᳚यꣳसन् - यꣳस ञ्छर्म शर्म᳚ यꣳसन्न् ।
यꣳसन्निति॑ यꣳसन्न् ॥

Pdf created by Shri P. R Iyer and Priya R Iyer

28 September 2021